श्रीश्री गुरुगौराङ्गौ जयतः

# आत्मपरिचयः

कक्षा ६



भक्तिवेदान्त गुरुकुलम् एवम् अन्तर्राष्ट्रियविद्यालयः, वृन्दावनम्

संस्थापकाचार्यः – कृष्णकृपामूर्तिः अभयचरणारविन्दभक्तिवेदान्तस्वामीप्रभुपादः

लेखकाः

लीलापुरुषोत्तमदासः

बलरामकृपादासः

पवनगोयलः

# विषय–सूची


| अध्यायः | विषयः | पृष्ठः |
|---|---|---|
| प्रथमः | आत्मपरिचयः | २ |
| द्वितीयः | विष्णुपुरग्रामः | ६ |
| तृतीयः | गोमाता | १० |
| चतुर्थः | श्रीकृष्णः | १४ |
| पञ्चमः | कृष्णनगरम् | १९ |
| षष्ठः | भक्तिवेदान्तगुरुकुलम् | २३ |
| सप्तमः | श्रीलप्रभुपादः | २८ |

प्रथमः अध्यायः

# आत्मपरिचयः



मम नाम गोपालः । मम जन्म विष्णुपुरग्रामे अभवत् । पूज्यपादः नारायणदासः मम पिता तथा पूज्या रुक्मिणी मम माता । बलरामः मम अग्रजः तथा सुभद्रा मम अनुजा । भारतवर्षः मम देशः अतः अहं भारतीयः । अहं द्वादशवर्षीयः ।

अहं षष्ठकक्षायाम् अहम् अध्ययनं करोमि । अहं भक्तिवेदान्तगुरूकुले पठामि । मम अग्रजः अपि अत्र अध्ययनं करोति । परन्तु मम अनुजा अत्र पठितुं न शक्नोति यत् एतस्मिन् गुरुकुले बालकाः एव पठन्ति । मम विद्यालये सर्वे शिक्षकाः छात्रान् सस्नेहम् अनुशासनेन च अध्यापयन्ति । ते सर्वे कृष्णभक्ताः सन्ति । अहम् आत्मा कृष्णदासः च इति मम वर्गशिक्षकः उपदिशति । परन्तु इदानीम इदं ज्ञानं मम बोधगम्यं न भवति । क्रमशः अभ्यासेन इदं ज्ञानं मम बोधगम्यं भविष्यति इति मम विश्वासः । भिन्नानि

पुस्तकानि अध्ययने मम रुचिः अस्ति । परन्तु श्रीमद्भागवतस्य अध्ययनेन श्रवणेन च मम चेतः आनन्दमयः भवति ।

अहं प्रातः स्नानादिकं कृत्वा आश्रमस्य छात्रैः सह कृष्णबलराममन्दिरं मङ्गलारतेः दर्शनार्थं गच्छामि । मङ्गलारतिसमये दिव्यविग्रहाणां दर्शनेन कृष्णकीर्तनस्य श्रवणेन च मम चित्ते आनन्दः स्फुरति । गुरुकृष्णकृपाहेतवे अहम् आचार्यश्रीलप्रभुपादस्य सङ्गलाभं करोमि । अहं गुरुकुले आत्मानं भाग्यवन्तम् इति मन्ये ।

* हरे कृष्ण *

## *प्रश्नोत्तर–विभागः*

१. गोपालस्य जन्म कुत्र अभवत् ?

२. गोपालस्य पिता कः ?

३. गोपालस्य माता का ?

४. गोपालस्य भगिनी का ?

५. बलरामस्य अनुजः कः तस्य अनुजा का च ?

६. गोपालः कुत्र पठति ?

७. गोपालस्य अनुजा भक्तिवेदान्तगुरुकुले किमर्थं पठितुं न शक्नोति ?

८. गोपालस्य रुचिः कस्मिन् विषये अस्ति ?

९.गोपालः आत्मानं भाग्यवन्तम् इति कथं मन्यते ?

१०.भवान् गोपालस्य आत्मपरिचयं श्रुतवान् । भवतः आत्मपरिचयः कः? लिख्यताम् ।

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). अभवत् – [भू]

अद्य वर्षा न अभवत् ।

ख). करोमि – [कृ]

अहं भोजनं करोमि ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

पठामि [पठ्], अध्यापयन्ति [अधि+ई], उपदिशन्ति [उप+दिश्], अस्ति [अस्], गच्छामि [गम्], स्फुरति [स्फुर्], मन्ये [मन्]।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). मम – [अस्मद्]

**मम** अग्रजः बहिः क्रीडितुं गतवान् ।

ख). ग्रामे – [ग्राम] (विद्यालये, गृहे, आश्रमे, मन्दिरे)

मम **ग्रामे** निरन्तरं रामायणस्य पाठः भवति ।

ग). मातुः – [मातृ]

आज्ञाकारिणः बालकाः **मातुः** आज्ञां पालयन्ति ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु।

नाम [नामन्], जन्म [जन्मन्], कक्षायाम् [कक्षा], गुरूकुले [गुरूकुल], एतस्मिन् [एतत्], विद्यालये [विद्यालय], स्नेहात् [स्नेह], अनुशासनात् [अनुशासन], विग्रहाणाम् [विग्रह], प्रभुपादस्य [प्रभुपाद] ।


॥ हरि ॐ तत्सत् ॥

द्वितीयः अध्यायः

# विष्णुपुरग्रामः

विष्णुपुरग्रामः मम जन्मस्थानम् अस्ति । मम ग्रामस्य पृष्ठतः गङ्गानदी प्रवहति । प्रातः सर्वे ग्रामवासिनः नद्यां स्नानं कुर्वन्ति । गङ्गानदी अस्माकं माता इति पूज्यते । प्रायः सर्वे ग्रामवासिनः कृषकाः एव सन्ति । गङ्गाकृपया कृषकाणां कृषिकर्माणि सुचारुरूपेण सम्भवन्ति । ते प्रतिवर्षं सहजेन भिन्नानि शस्यानि उपजनयन्ति । कतिपयाः जनाः ब्रह्मकर्म अपि कुर्वन्ति ।

गङ्गातीरे एकं पुरातनं राधाकृष्णमन्दिरम् अस्ति । तत्र प्रतिदिनं प्रातः मङ्गलारतिः भवति । प्रातःकालीनकृष्णकीर्तनस्य मधुरः ध्वनिः सर्वान् आकर्षति । पण्डिताः एतस्मिन् मन्दिरे नित्यं श्रीमद्भागवतस्य पाठं कुर्वन्ति । अत्र जन्माष्टमीमहोत्सवः सर्वोपरि सर्वेषां च मनोहरः । ग्रामस्य पूर्वदिशि एकः विद्यालयः अस्ति । ग्रामस्य सर्वे बालकाः  बालिकाः च तत्रैव पठन्ति । परन्तु एतस्मिन् विद्यालये पाठ्यक्रमः पञ्चमकक्षापर्यन्तम् एव अस्ति । अतः अहं विद्याध्ययनस्य कृते भक्तिवेदान्तगुरुकुलम् आगतवान् ।





यद्यपि मम ग्रामः भूगोलपुस्तके न उल्लिखितः तथापि एतत् एकं सुन्दरं रमणीयं च स्थानम् अस्ति । अत्र अहं मम मित्रैः सह बाल्यकाले विभिन्नाः क्रीडाः क्रीडामि स्म । अहं गङ्गानदीतटे अनेकान् बालुकागृहान् सृष्टवान् । शुक्लपक्षे रात्रिकाले गुप्त–अन्वेषणादिक्रीडाः जनसम्मोहिन्यः आसन् । एषः विष्णुपुरग्रामः मम अतीव प्रियः । एतस्य ग्रामस्य जनाः सरलाः तथा कुलस्त्रियः मातातुल्याः सन्ति । ते सर्वेऽपि कृष्णभक्ताः सन्ति । अत्र गावः प्रफुल्लिताः विचरन्ति तथा गङ्गाजलं पीत्वा प्रहृष्टाः भवन्ति । सर्वदिशि मम ग्रामः रमणीयः दृश्यते । मम ग्रामः यत्र मयूराः कूजन्ति गावः सहृष्टं विचरन्ति तुलस्यः सहृष्टं वर्धन्ते । एषः ग्रामः वृन्दावनसदृशः शोभते ।

* हरे कृष्ण *

*प्रश्नोत्तर–विभागः*

१. विष्णुपुरग्रामे राधाकृष्णमन्दिरं कुत्र अस्ति ?

२. विष्णुपुरग्रामे पण्डिताः नित्यं कस्य पाठं कुर्वन्ति ?

३. विष्णुपुरग्रामे विद्यालयः कुत्र अस्ति ?

४. विष्णुपुरग्रामे सर्वोपरि महोत्सवः कः ?

५. विष्णुपुरग्रामे गावः कथं प्रहृष्टाः भवन्ति ?

## *रिक्त–स्थानं पूरयन्तु*

१. मम ग्रामस्य पृष्ठतः गङ्गानदी _________ ।

२. प्रायः सर्वे ग्रामवासिनः _______ एव सन्ति ।

३. गङ्गातीरे एकं पुरातनं ________________ अस्ति ।

४. अत्र _____________ सर्वोपरि सर्वेषां मनोहरः च ।

५. गङ्गानदीतटे अनेकान् बालुकागृहान् _________ ।

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). प्रवहति – [प्र+वह्]

यमुना वृन्दावने **प्रवहति** ।

ख). पूज्यते – [पूज्]

विद्वान् सर्वत्र **पूज्यते** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

सम्भवन्ति [सम्+भू], उपजनयन्ति [उप+जन्+णिच्], वर्तते [वृत्], भवन्ति [भू],
दृश्यते [दृश्+यक्], कूजन्ति [कूज्], चरन्ति [चर्], वर्धन्ते [वृध्], शोभते [शुभ्], अस्ति [अस्], सन्ति [अस्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।


क). वासिनः – [वासिन्]
सर्वे **वृन्दावनवासिनः** कृष्णभक्ताः ।
ख). नद्याम् – [नदी]
अहं ह्यः **यमुनानद्यां** स्नानं कृतवान् ।
उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

स्नानम् [स्नान], कृषकाणाम् [कृषक], कृपया [कृपा], शस्यानि [शस्य], पण्डिताः [पण्डित], दिशि [दिश्], पुस्तके [पुस्तक], क्रीडाः [क्रीडा], मयूराः [मयूर], गावः [गौ], तुलस्यः [तुलसी] ।

॥ हरि ॐ तत्सत् ॥

तृतीयः अध्यायः

# गोमाता



माता सर्वत्र पूज्या । वैदिकाः भूदेवीं ब्राह्मणभार्यां धात्रीं राजपत्नीं गुरुमातरं गां च स्वमातातुल्यां पूजयन्ति । गोमाता सत्त्वगुणयुक्ता अतः सा अहिंसका



सरला मुग्धस्वभावा निरुपद्रवा निर्मलचित्ता च । ग्राम–प्रदेशेषु भारतीयाः गाः गृहे गृहे पालयन्ति । ते ताः गौरी पद्मा श्यामा राधादिभिः नामभिः आदरेण आह्वयन्ति । बहवः सन्ताः देशस्य भिन्नेषु प्रान्तेषु गोशालाः स्थापयन्ति । तत्र गोपालनं सुचारु रूपेण भवति । तत्कृते ज–नाः दानं कुर्वन्ति । भारतवर्षे गोपालनम् एकं पुण्यकर्म इति सर्वेषां विश्वासः ।



वेदेषु शास्त्रेषु च गोपालनस्य कृते अनेके उपदेशाः वर्णिताः सन्ति । पुरुषोत्तमः भगवान् श्रीकृष्णः वेदेषु गोरक्षकरूपेण पूज्यते । यथा अस्मिन् श्लोके अयम् उपदेशः उल्लिखितः

*नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।*
*जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥*



प्रकृतपक्षे कृषिकर्माणि ग्रामजीवनानि च गोमातरं विना असंभवानि एव । गोमातुः गव्यानि यथा मूत्रं गोमयं दुग्धं दधि घृतं च पञ्चगव्यरूपेण प्रसिद्धानि । पूजादि पुण्यकर्मषु पञ्–चगव्यानां प्रयोगः आवश्यकः । दुग्धं दधि घृतं मधु शर्कराजलं च संमिश्र्य पञ्चामृतं संभवति । गोमयं गोमूत्रं च संमिश्र्य कृषकाः जैविकसारं निर्मान्ति । जैविकसारप्रयोगेण शस्यक्षेत्राणि शस्यप्रदानि भवन्ति । गोदुग्धम् एकं संपूर्णम् आहारम् । बालतः वृद्धपर्यन्तं सर्वेषां कृते दुग्धम् आवश्यकम् । नवनीतम् अन्यैकं गोमातुः स्वाद्वन्नम् । बालकृष्णाय नवनीतम् अधिकं रोचते अतः सः नवनीतं चोरयति यतः तस्य नाम नवनीतचोरः ।





पुराकाले धर्मपरायणराजानः ब्राह्मणेभ्यः गोदानं कृत्वा सन्तुष्यन्ति स्म । अन्ये श्रीमन्तः पुण्यकर्मसमये गोदानं कुर्वन्ति स्म । धुनापि जनाः कन्याविवाहकाले गोदानं कुर्वन्ति । अतः वैज्ञानिकदृष्ट्या शास्त्रचक्षुषा च सर्वैः गोमाता पूज्या एव ।



* हरे कृष्ण *

## *प्रश्नोत्तर–विभागः*

१. वैदिकाः कां स्वमातातुल्यां पूजयन्ति ?

२. गोमता निर्मलचित्ता कथं भवति ?

३. वेदेषु गोरक्षकरूपेण कः पूज्यते ?

४. पञ्चगव्यानां नामानि तेषाम् उपयोगं च कथयन्तु ।

५. पञ्चामृतं कथं संभवति ?

६. कृषकाः कथं जैविकसारं निर्मान्ति ?

७. जैविकसारप्रयोगेन कः लाभः ?

८. बालकृष्णस्य नाम नवनीतचोरः किमर्थम् ?

९. शस्त्रचक्षुषा गोमाता कथं पूज्या ? वर्णयन्तु ।

१०. वैज्ञानिकदृष्ट्या गोमाता कथं पूज्या ? वर्णयन्तु ।

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). पालयन्ति – [पाल्]

गोपालाः गाः पालयन्ति ।

ख). प्रदर्शयन्ति – [प्र+दृश्]

कलाकाराः स्वकलां प्रदर्शयन्ति ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

आह्वयन्ति [आ+ह्वे], स्थापयन्ति [स्थापि], सन्तुष्यन्ति [सम्+तुष्], निर्मान्ति [निर्+मा], पूजयन्ति [पूज्], सन्तुष्यन्ति [सम्+तुष्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यकरूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). वैदिकाः – [वैदिक]
वैदिकाः यज्ञं संपादयन्ति।
ख). उपदेशाः – [उपदेश]
भगवद्गीतायाः उपदेशाः समीचीनाः ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

भार्याम् [भार्या], गाः [गौ], द्रव्याणि [द्रव्य], चक्षुषा [चक्षुस्], दृष्ट्या [दृष्टि], श्रीमन्तः [श्रीमत्]

॥ हरि ॐ तत्सत् ॥

चतुर्थः अध्यायः

# श्रीकृष्णः



श्रीकृष्णः स्वयं भगवान् इति श्रीमद्भागवते व्यासशुकनारदसूतादिऋषयः उपदिशन्ति । श्री नन्दमहाराजः कृष्णस्य पिता तथा श्रीमती योशोदा तस्य माता । पञ्चसहस्रवर्षपूर्वं सः मथुरानगरे कारागृहे देवकीपुत्ररूपेण आत्ममायया प्रकटितवान् । योगबलेन वसुदेवः तं मध्यरात्रौ जलाप्लवितां यमुनानदीम् अतिक्रम्य मा–तायोशोदायाः शय्यायाम् अस्थापयत् ।



नन्दगृहाङ्गणे भगवान् श्रीकृष्णः भिन्नाः भिन्नाः बाल्यलीलाः कृत्वा सर्वेषां चित्तान् आकर्षितवान् । लता वा गुल्मः वा पक्षी वा सर्वे देवाः अपि तेन आकर्षिताः अतः तस्य नाम कृष्णः । गोप्यः वृन्दावनकृष्णम् ईदृशं वर्णयन्ति

*बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं*
*बिभ्रद् वासः कनक–कपिशं वैजयन्तीं च मालाम् ।*
*रन्ध्रान् वेणोर् अधरसुधयापूरयन् गोपवृन्दैर्*
*वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः॥*

अस्य श्लोकस्य अयं भावः –

कृष्णशिरसि मयूरपुच्छं शोभते । तस्य कर्णयुगलौ कर्णिकारपुष्पैः सुसज्जितौ । सः पीतवासः वैजयन्तीमालां च धारयित्वा रमणीयः दृश्यते । सः एतैः अलङ्कारैः सज्जितः नटवरवपुः अधरसुधया वेणोः रन्ध्रान् *पूरयन्* स्वपदरमणं



वृन्दारण्यं प्रविष्टवान् (प्रविशति) । गोपवृन्दैः तस्य कीर्तिः गीता । वस्तुतः भगवतः नामानि तु अनेकानि परन्तु तेषां मध्ये कृष्णनाम मुख्यम् । भक्ताः तं योशदानन्दन !, नन्दसुत !, देवकीनन्दन !, वासुदेव !, राधिकारमण !, गोपीनाथ ! इति विभिन्ननामभिः आह्वयन्ति । सः न च्युतते अतः तस्य नाम अच्युतः । (न च्युतते इति अच्युतः) । (मा–राधिका तस्याः धवः (पतिः) माधवः।) (क=ब्रह्मा) (ईशः शिवः) क च ईश च केश तौ केशौ तेन "व" वशीभूतौ अतः तस्य नाम केशवः । एतादृशानि कृष्णस्य अनन्तानि नामानि सन्ति ।



सः सर्वव्याप्तः सर्वस्य सुहृदः च । सः एवं विश्वं सृजति पालयति नाशयति च । तस्य अनुग्रहेण एव जीवः भक्तियोगं स्वीकृत्य दिव्यानन्दं प्राप्नोति (अनुभवति) । तस्य कृपां विना जीवः संसारचक्रे शश्वत् प्रविशति । अतः कृष्णशरणागतिं स्वीकृत्य कृष्णभक्तेः अभ्यासः करणीयः ।

* हरे कृष्ण !*

## *प्रश्नोत्तर–विभागः*

१. श्रीकृष्णः भगवान् इति के उपदिशन्ति ?

२. कृष्णस्य पितुः नाम किम् ?

३. कृष्णः कदा प्रकटितवान् ?

४. कृष्णः कुत्र प्रकटितवान् ?

५. कृष्णस्य कति नामानि सन्ति ?

६. कृष्णस्य त्रीणि नामानि तथा तेषां वर्णनं कुर्वन्तु ।

७. कः विश्वं सृजति पालयति च ?

८. कृष्णस्य कृपया जीवः किं प्राप्नोति ?

९. कृष्णशरणागतिं स्वीकृत्य किं करणीयम् ?

## *रिक्त–स्थानं पूरयन्तु*

१. पञ्चसहस्रवर्षपूर्वं सः ______________देवकीपुत्ररूपेण आत्ममायया प्रकटितवान् ।

२. नन्दगृहाङ्गणे भगवान् श्रीकृष्णः भिन्नाः भिन्नाः बाल्यलीलाः कृत्वा सर्वेषां चित्तान् ______।

३. सः एवं विश्वं सृजति ___________ नाशयति च ।

४. तस्य कर्णयुगलौ __________ सुसज्जितौ ।

५. अतः कृष्णशरणागतिं स्वीकृत्य _________अभ्यासः करणीयः ।

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). प्रकटितवान् – [प्र+कट्]

हरिः भक्तस्य हृदि **प्रकटितवान्** ।

ख). प्रविशति – [प्र+विश्]

छात्रः कक्षां **प्रविशति** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

अस्थापयत् [स्था], वर्णयन्ति [वृण्], प्राविशत् [प्र+विश्], प्रणश्यन्ति [प्र+नश्], आह्वयन्ति [आ+हू], प्राप्नोति [प्र+आप्], प्रविशति [प्र+विश्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). कारागृहे – [कारागृह]

अपराधिनः **कारागृहे** निवसन्ति ।

ख). शय्यायाम् – [शय्या]

अहं प्रतिदिनं **शय्यायाम्** एव शयनं करोमि ।

ग). चित्तान् – [चित्त]

कृष्णः सर्वेषां **चित्तान्** आकर्षति ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

गोप्याः [गोपी], आङ्गणे [आङ्गण], वृन्दैः [वृन्द], अधरसुधया [अधरसुधा], वेणोः [वेणु], रन्ध्रान् [रन्ध्र], एतैः [एतत्], भगवतः [भगवत्], राधिकायाः

[राधिका], भक्तेः [भक्ति] ।

३. शब्दपरिचयः

सः किं करोति ?

एतेषां शब्दानां प्रयोगं कुर्वन्तु –


कीर्तनम्, दानम्, ध्यानम्, स्नानम्, चिन्तनम्, पठनम्, अध्ययनम्, अध्यापनम्, अनुकरणम्, अन्वेषणम्, अभिनन्दनम्, अर्पणम्, अनुसरणम्, आयोजनम्, उद्घाटनम्, उच्चारणम्, कूर्दनम्, क्रन्दनम्, क्षालनम्, चर्वणम्, चित्रणम्, टङ्कनम्, ताडनम्, दर्शनम्, धावनम्, निर्माणम्, पलायनम्, पारायणम्, प्रस्था–नम्, प्रेषणम्, भजनम्, भक्षणम्, भाषणम्, भोजनम्, मननम्, मिश्रणम्, मार्जनम्, मेलनम्, रक्षणम्, लेखनम्, वर्धनम्, शयनम्, शिक्षणम्, श्रवणम्, संशोधनम्, समाधानम्, स्मरणम्, सम्मेलनम्, सम्बोधनम्

यथा – सः **कृष्णकीर्तनं** करोति ।

॥ हरि ३ॐ तत्सत् ॥

पञ्चमः अध्यायः

# कृष्णनगरम्



कृष्णनगरम् एकम् ऐतिहासिकं संपन्नं प्राचीनं च स्थानम् अस्ति । अत्र सहस्रवर्षपूर्वनिर्मिताः राजप्रासादाः मन्दिराणि च अधुना अपि वर्तन्ते । पुण्यवृक्षाः उद्यानानि उपवनानि च एतस्य नगरस्य शोभां वर्धयन्ति । नगरस्य मध्ये अनेके प्राकृतिकाः कृत्रिमाः च जलाशयाः विद्यन्ते । नगरप्रवेशस्थाने भव्यं गोपूरद्वारम् एतस्य नगरस्य शोभां वर्धयति । नगरस्य प्रशस्तमार्गेषु स्थिताः छायाप्रदाः वृक्षाः पथिकानां कृते यातायातकाले सहायकाः भवन्ति । अत्र राजमार्गाः उपमार्गाः आपणाः च सदा सम्मार्जिताः विद्यन्ते ।

नगरस्य केन्द्रे एकं लक्ष्मीनारायणमन्दिरं शोभते । मन्दिरस्य अग्रतः एकः विशालः जलाशयः अस्ति । तस्मिन् जलाशये विभिन्नानि उत्पलानि पुष्पाणि च विकसन्ति । हंसाः सारसाः चक्रवाकाः च कूजन्तः तत्र आनन्देन तरन्ति । भक्ताः विग्रहदर्शनात् अनन्तरं जलाशयस्य पार्श्वे उपविशन्ति । तत्र ते कीर्तनं श्रुत्वा आध्यात्मिकानन्दं अनुभवन्ति । मन्दिरस्य समीपे एकं क्रयविक्रयकेन्द्रम् अस्ति । अत्र व्यापारिणः कृषिवस्तूनां पूजासामग्रीणां कार्पासवस्त्राणां च व्यापारं कुर्वन्ति । नगरस्य पूर्वदिशि एका बृहती रामलीलाभूमिः अस्ति । अत्र सांस्कृतिकाः कार्यक्रमाः यथा– जन्माष्टमीमहोत्सवः रामनवमीमहोत्सवः गौरपूर्णिमामहोत्सवादयः भव्यरूपेण आयोज्यन्ते ।



नगरस्य बहिः एकः प्रसिद्धः विश्वविद्यालयः अस्ति । एतस्मिन् विश्वविद्यालये गणितविभागः विज्ञानविभागः कलाविभागः संस्कृतविभागः भगवद्दर्शनविभागः एवम् अन्ये अपि विभागाः सन्ति । एतेषु विभागेषु छात्राः स्नातकोत्तरशिक्षां लभन्ते । भगवद्दर्शनपाठ्यक्रमः विश्वस्य छात्राः छात्रान् च विशेषरूपेण आ-कर्षति । अत्र संस्कृतभाषायाः अध्ययनार्थम् अन्तर्राष्ट्रियाः विद्यार्थिनः आग-च्छन्ति । कृष्णनगरं भारतवर्षे उच्चशिक्षाविकासार्थाय कलाविकासार्थाय च प्रसिद्धिं प्राप्तवान् । कृष्णनगरं वैदिकसभ्यतायाः एकं सुन्दरम् अभिज्ञानम् इति ऐतिहासिकाः मन्यन्ते ।

* हरे कृष्ण !*

*<u>प्रश्नोत्तर-विभागः</u>*

१. कृष्णनगरे क्रयविक्रयकेन्द्रं कुत्र अस्ति ?

२. कृष्णनगरे के के सांस्कृतिकाः कर्यक्रमाः भवन्ति ?

३. रामलीला-भूमिः कुत्र अस्ति ?

४. कृष्णनगरस्य बहिः किम् अस्ति ?

५. विश्वविद्यालये के के विभागाः सन्ति ?

६. अन्तर्राष्ट्रियाः छात्राः विश्वविद्यालयं किमर्थम् आगच्छन्ति ?

७. विष्णुपुरग्रामस्य अपेक्षया कृष्णनगरे काः विशेषताः सन्ति ?

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). वर्तन्ते – [वृत्]

भारतवर्षे अनेकानि मन्दिराणि **वर्तन्ते** ।

ख). वर्धयन्ति – [वृध्]

पुष्पाणि जलाशयस्य शोभां **वर्धयन्ति** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

भवन्ति [भू], विद्यन्ते [विद्], विकसन्ति [वि+कास्], तरन्ति [तृ], उपविशन्ति [उप+विश्], अनुभवन्ति [अनु+भू], आयोज्यन्ते [आ+युज्+यक्], लभन्ते [लभ्], आकर्षति [आ+कृष्], आगच्छन्ति [आ+गम्], प्राप्तवान् [प्र+आप्], मन्यन्ते [मन्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). प्रासादाः – [प्रासाद]

राजस्थाने बहवः **प्रासादाः** वर्तन्ते ।

ख). वृक्षाः – [वृक्ष]

मन्दिरप्राङ्गणे मनोहराः **वृक्षाः** सन्ति ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

विद्यार्थिनः [विद्यार्थी], ऐतिहासिकाः [ऐतिहासिक], विभागाः [विभाग], एतस्मिन् [एतत्], चक्रवाकाः [चक्रवाक], उत्पलानि [उत्पल], विश्वस्य [विश्व], सभ्यतायाः [सभ्यता] ।

३. शब्दपरिचयः –

पूजकः, शिक्षकः, चालकः, पालकः, वादकः, साधकः, गणकः, भक्षकः, वाचकः, योजकः, प्रकाशकः, संशोधकः, सम्पादकः, विचारकः, जनकः, रन्धकः, प्रचारकः, उत्पादकः, अध्यापकः, अन्वेषकः, आलोचकः, प्रेषकः

एतेषां शब्दानां प्रयोगेण वाक्यानि रचयन्तु यथा –

क). पूजकः पूजयति ।

ख). गणकः गणयति ।


ग). संपादकः संपादयति ।

घ). विचारकः विचारं करोति। विचारकः विचारयति ।

॥ हरि ॐ तत्सत् ॥

षष्ठः अध्यायः

# भक्तिवेदान्तगुरुकुलम्




श्रीलप्रभुपादेन वृन्दावनधाम्नि एकं रमणीयं गुरुकुलम् स्थापितम् अस्ति । तस्य गुरुकुलस्य नाम भक्तिवेदान्तगुरुकुलम् अस्ति । संस्थापकाचार्येण उक्तं यत् एतस्य गुरुकुलस्य उद्देश्यं कृष्णभावनामृतशिक्षायाः प्रसारः प्रचारः च इति । अत्र बालकाः एव अध्ययनं कुर्वन्ति । ते बालकाः छात्रावासे तिष्ठन्तः आध्यात्मिकजीवनशैलीं स्वीकृत्य शिक्षाभ्यासं कुर्वन्ति ।

सर्वे छात्राः प्रातः चतुर्वादने उत्थाय स्नानादीनि शौचकर्माणि कुर्वन्ति । ते समवस्त्राणि परिधाय ललाटे तिलकं च स्थापयित्वा कृष्णबलराममन्दिरं समा–गच्छन्ति । सार्धचतुर्वादने मङ्गलारतिः भवति । समवेताः भक्ताः विग्रहान् प्रणम्य कृष्णकीर्तनं कुर्वन्ति । गुरुकुलछात्राः नृत्यन्तः हरेकृष्णमहामन्त्रं गायन्ति सर्वे छात्राः मङ्गलारतेः अनन्तरं हरेकृष्णमन्त्रजपं योगासनं प्राणायामं च आ–नन्देन संपादयन्ति । ते सार्धसप्तवादने अल्पाहारं गृह्णन्ति । ते अष्टवादनात् आरभ्य मध्याह्नभोजनपर्यन्तम् अध्ययने संलग्नाः भवन्ति । तत्र आङ्ग्लभाषा

हिन्दीभाषा संस्कृतभाषाद्यः पाठ्यन्ते । तत्र छात्राः गणितविद्यां भौतिकविज्ञानम् इतिहासादीन् पाठान् च पठन्ति । ते विभिन्नेषु कलाशास्त्रेषु यथा चित्रकलायां सङ्गीतकलायां च कौशलं प्राप्नुवन्ति ।

छात्राः अपराह्णसमये क्रीडायां नियोजिताः भवन्ति । ते सर्वे सायंकाले छात्रावासे सन्ध्यारतिं कृत्वा अध्ययने मनोवेशयन्ति । सर्वे रात्रौ नववादने शयनं कर्तुं स्वप्रकोष्ठान् प्रतिगच्छन्ति । गुरुकुलस्य शिक्षकाः शिक्षिकाः च छात्रान् पुत्रतुल्यान् परिपालयन्ति । छात्रापि पूज्यान् गुरुजनान् सत्कुर्वन्ति । गुरुजनानाम् उपदेशान् ते विनयेन पालयन्ति । गुरुकृष्णकृपया धन्याः छात्राः विभिन्नाषु विद्याषु कलासु क्रीडाषु च पारदर्शितां प्राप्य गुरुकुलस्य मानं वर्धयन्ति ।

गुरुकुलप्राचार्याः छात्रचरित्राणां शोधनस्य कृते वरिष्ठान् साधून् आमन्त्र्य तान् उपदिशन्ति । सर्वे जनाः छात्राणां आध्यात्मिकं चारित्र्यम् तथा तेषां सर्वाङ्गीणं विकासं दृष्ट्वा मुग्धाः भवन्ति प्रशंसन्ति च । ते छात्राः संस्थापकाचार्यश्रीलप्रभुपादस्य कृपया भविष्यकाले कृष्णभावनामृतराष्ट्रनिर्माणकार्ये सहायकाः भविष्यन्ति इति सर्वेषां विश्वासः ।

* हरे कृष्ण !*

## *प्रश्नोत्तर–विभागः*

१. भक्तिवेदान्तगुरुकुलं केन स्थापितम् ?

२. एतस्य गुरुकुलस्य उद्देश्यं किम् ?

३. बालकाः अल्पाहारं कदा गृह्णन्ति ?

४. छात्राः प्रातःकाले किं किं संपादयन्ति ?

५. गुरूकुले काः भाषाः पाठ्यन्ते ?

६. छात्राः कथं गुरूकुलस्य मानं वर्धयन्ति ?

७. भवान् गुरुकुलस्य सम्मानाय किं करिष्यति ?

८. छात्राः क्रीडायां कदा नियोजिताः भवन्ति ?

९. गुरुकुलस्य दिनचर्यां स्वशब्देषु लिखन्तु ।

१०. सर्वेषां कीदृशः विश्वासः ?

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). गायन्ति – [गै]

छात्राः गुरुकुले प्रातः वृन्दावनस्य महिमानं **गायन्ति** ।

ख). प्रतिगच्छन्ति – [प्रति+गम्]

छात्राः गृहं **प्रतिगच्छन्ति** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

समागच्छन्ति [सम्+आ+गम्], आरभ्यते [आ+रभ्+यक्], पालयन्ति [पाल्], प्रशंसन्ति [प्र+शंस्], सत्कारयन्ति [सत्+कृ+णिच्], सत्कुर्वन्ति [सत्+कृ], गृह्णन्ति [गृह्], उपदिशन्ति [उप+दिश्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

छात्रावासे – [छात्रावास]

**छात्रावासे** छात्राः अनुशासनेन पठन्ति ।

शिक्षाभ्यासः – [शिक्षाभ्यास]

सर्वैः **शिक्षाभ्यासः** करणीयः ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

शास्त्रेषु [शस्त्र], प्रकोष्ठः [प्रकोष्ठ], चरित्राणाम् [चरित्र], ललाटे [ललाट], विग्रहान् [विग्रह], आनन्देन [आनन्द], अष्टवादनात् [अष्टवादन], क्रीडायाम् [क्रीडा], विनयेन [विनय] ।

३. समयज्ञानम्

प्रातःकाल/प्रभातम्

मध्याह्ने :– अहं **मध्याह्ने** स्नामि ।

पराह्ने :– राधा प्रतिदिनं पराह्ने नवनीतं आनयति ।

सायङ्काले :– **सायङ्काले** मन्दिरे आरतिः भवति ।

रात्रौ :– **रात्रौ** अष्टवादने प्रसादं भवति ।

४:०० – चतुर्वादनम्

४:०५ – पञ्चाधिकचतुर्वादनम्

४:१५ – सपादचतुर्वादनम्

४:३० – सार्द्धचतुर्वादनम्

४:४५ – पादोन पञ्चवादनम्


४:५० – दशोन पञ्चवादनम्

५:०० – पञ्चवादनम्

॥ हरि ॐ तत्सत् ॥

सप्तमः अध्यायः

# श्रीलप्रभुपादः



कृष्णकृपामूर्तिः अभयचरणारविन्दभक्तिवेदान्तस्वामी श्रीलप्रभुपादः कोलकत्तानगरे १८९६ तमे वर्षे प्रकटः जातः । परमपूज्यः भक्तिसिद्धान्तसरस्वतीठाकुरः प्रभुपादस्य गुरुदेवः । सः स्वगुरुदेवं १९२२ तमे वर्षे कोलकत्तानगरे मिलितवान् । गौडीयमठस्य संस्थापकाचार्यः श्रीलभक्तिसिद्धान्तसरस्वतीगोस्वामी अभयचरणं गौडीयदर्शनशास्त्राणाम् अध्ययनार्थं आङ्ग्लभाषया प्रचारार्थं च प्रेरितवान् । सरस्वतीगोस्वामी अवदत् यत् अभयचरणः एकः विद्वान् युवकः अतः सः आङ्ग्लभाषया कृष्णदर्शनं वर्णितुं समर्थः अस्ति ।

गोस्वामीमहोदयस्य कृपया अभयचरणः गौडीयदर्शनं प्रसारयितुं स्वजीवनं समर्पितवान् । सः १९३३ तमे वर्षे सरस्वतीगोस्वामिना शिष्यरूपेण दीक्षितः जातः । अभयचरणः गृहस्थाश्रमे तिष्ठन् एव आङ्ग्लभाषायाम् 'बैक् टू गॉडहेड्' इति पत्रिकां प्रकाशितवान् । प्रभुपादस्य शिष्याः एतस्याः पत्रिकायाः प्रकाशनं अद्यापि निर्वहन्ति । अस्याः वितरणं विश्वस्य अधिकासु भाषासु प्रचलति । श्रीलप्रभुपादः १९५० तमे वर्षे वानप्रस्थाश्रमम् अङ्गीकृतवान् । तदा सः राधादामोदरमन्दिरस्य प्राङ्गणे एकस्मिन् प्रकोष्ठे स्थितः सन् निराडम्बरं जीवनं स्वीकृतवान् । तत्र सः गौडीयग्रन्थान् समाधीतवान् । तेन श्रीमद्भागवतग्रन्थस्य प्रथमस्कन्धस्य आङ्ग्लभाषायाम् अनुवादः तत्र एव कृतः ।

सः १९५९ तमे वर्षे संन्यासाश्रमं स्वीकृतवान् । सः स्वगुरूदेवस्य प्रेरणां साकारां कर्तुं १९६५ तमे वर्षे जलदूतयानेन अमेरिकादेशं प्रति गतवान् । तदानीं सः सप्ततिवर्षीयः आसीत् । सः आमेरिकाम् गत्वा न्यूयॉर्कनगरे २६ अवेन्यू नामकस्थाने १९६६ तमे वर्षे अन्तराष्ट्रियकृष्णभावनामृतसंघं संस्थापितवान् । सः आमेरिकां गमनानन्तरं विश्वव्यापिनः अनेकान् शिष्यान् दीक्षितवान् कृष्णभक्तेः च प्रचारं कृतवान् । तेन श्रीमद्भागवतश्लोकानां श्रीमद्भगवद्गीताश्लोकानां च आङ्ग्लभाषया तात्पर्याणि लिखितानि सन्ति । प्रभुपादः श्रीलकृष्णदासकविराजेन विरचितानां चैतन्यचरितामृतश्लोकानाम् अपि तात्पर्याणि लिखितवान् । सः गौडीयभक्तिग्रन्थानां सारं स्वरचितैः नाना–पुस्तकैः स्पष्टं कृतवान् । श्रीलप्रभुपादः गुरुकृष्णकृपया हरेकृष्णान्दोलनं सम्पूर्णे जगति प्रसारितवान् ।



अधुना बहवः युवकाः युवत्यः च भक्तियोगम् अङ्गीकृत्य एतम् आन्दोलनं समग्रजगति प्रसारयन्ति । अन्तराष्ट्रियकृष्णभावनामृतसंघस्य मुख्यः कार्यालयः श्रीचैतन्यदेवस्य जन्मस्थाने मायापुरे अस्ति । तत्र मायापुरचन्द्रोदयमन्दिरं स्व–शोभया बहून् तीर्थयात्रिणः आकर्षति । श्रीलप्रभुपादेन वृन्दावनधाम्नि एकं भव्यं कृष्णबलराममन्दिरं विस्थापितम् । भक्ताः मन्दिरम् आगत्य प्राचुर्येण श्रीकृष्णसंकीर्तनं अङ्गीकुर्वन्ति जीवनं च सफलीकुर्वन्ति । साम्प्रतम् एषा

संस्था विश्वव्यापिनी जाता अस्ति । एतस्याः संस्थायाः केन्द्राणि विश्वस्य महानगरेषु ग्रामेषु च सन्ति ।

वस्तुतः श्रीलप्रभुपादः एकः शक्त्यावेशः अवतारः अस्ति । श्रीचैतन्यदेवस्य मुख्यः सेनापतिः च । भक्ताः तस्य कृपया समग्रे विश्वस्मिन् हरेकृष्णमहामन्त्रस्य दिव्योच्चारणं कृत्वा कृष्णप्रेम प्राप्तुं शक्नुवन्ति । श्रीलप्रभुपादः सर्वैः पूजनीयः ।

* हरे कृष्ण !*

## *प्रश्नोत्तर–विभागः*

१. श्रील प्रभुपादः कोलकत्तानगरे कदा प्रकटितवान् ?

२. श्रील प्रभुपादस्य गुरूदेवः कः ? सः स्वगुरूदेवं कदा मिलितवान् ?

३. श्रीलप्रभुपादः केषां श्लोकानां तात्पर्याणि लिखितवान् ?

४. श्रील प्रभुपादः वानप्रस्थाश्रमे कुत्र निवासं कृतवान् ?

५. श्रील प्रभुपादः किमर्थम् अमेरिकादेशं गतवान् ?

## *रिक्त–स्थानं पूरयन्तु*

१. __________ तमे वर्षे सः संन्यासाश्रमं स्वीकृतवान् ।

२. सः स्वगुरूदेवस्य प्रेरणां साकारां कर्तुं ______तमे वर्षे जलदूतया–नेन _________ प्रति समायातः ।

३. अन्तराष्ट्रियकृष्णभावनामृतसंघस्य मुख्यकार्यालयः श्रीचैतन्यदेवस्य ज–न्मस्थाने ________ अस्ति ।

४. भक्ताः मन्दिरम् आगत्य प्राचुर्येण श्रीकृष्णसंकीर्तनं अङ्गीकुर्वन्ति जीवनं

___________ च ।

५. वस्तुतः श्रीलप्रभुपादः एकः ________ अवतारः तथा श्रीचैतन्यदेवस्य मुख्यः __________ ।

*व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

मिलितवान् – [मिल्+क्तवतु]

रामः श्यामं **मिलितवान्** ।

प्रेरितवान् – [प्र+ईर्+क्तवतु]

प्रभुपादः सर्वान् कृष्णभक्त्यार्थं प्रेरितवान् ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

अवदत् [वद्], प्रचलति [प्र+चल्], कृतवान् [कृ+क्त्वतु], आकर्षति [आ+कृष्]

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

आश्रमे – [आश्रम]

छत्रः **आश्रमे** तिष्ठति ।

पत्रिकायाः – [पत्रिका]

गुरुकुलं **पत्रिकायाः** प्रकाशनं करोति ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

युवकाः [युवक], युवत्यः [युवती], पुस्तकैः [पुस्तक], ग्रन्थान् [ग्रन्थ], या–नेन [यान], प्रकोष्ठे [प्रकोष्ठ], प्राङ्गणे [प्राङ्गण], शस्त्राणाम् [शास्त्र], यानेन [यान], स्वरचितैः [स्वरचित], रचितानाम् [रचित] ।

३. आयुः ज्ञानम्

क). **द्वादशवर्शीयः** कृष्णः मथुरां गतवान् ।

ख). **अष्टवर्षीयः** कृष्णः रासलीलां कृतवान् ।

ग). **१२५ वर्षीयः** कृष्णः स्वधाम गतवान् ।

घ). **चतुर्विंशवर्षीयः** चैतन्यमहाप्रभुः संन्यासं ग्रहीतवान् ।

ङ). अहम् **एकादशवर्षीयः** ।

प्रश्नोत्तराणि लिखन्तु ।

क). भवान् कतिवर्षीयः ?

ख). कतिवर्षीयः प्रभुपादः  अमेरिकां गतः ?

ग). कतिवर्षीयः कृष्णः रासलीलां सम्पदितवान् ?

४. वर्षज्ञानम्

क). श्रीलप्रभुपादस्य जन्म १८९६ तमे वर्षे अभवत् ।

ख). मम जन्म २००० तमे वर्षे अभवत् ।

ग). भवतः जन्म कदा अभवत् ?

घ). भारतदेशः १९४७ तमे वर्षे स्वतन्त्रतां प्राप्तवान् ।

५. शब्दपरिचयः

निम्नलिखितशब्दानां प्रयोगं कृत्वा उत्तरं लिखन्तु ।

लेखकः, मार्जकः, पाचकः, प्रदर्शकः, दर्शकः, चिकित्सकः, पूजकः, सम्पादकः, कृषकः, निरीक्षकः, अध्यापकः, प्रचारकः, प्रकाशकः, सहायकः, देशसेवकः, गायकः, वादकः, रञ्जकः, विधायकः, गोपालकः, साधकः, संस्थापकः, पशुपालकः, याचकः, धनिकः, अङ्गरक्षकः

॥ हरि ॐ तत्सत् ॥